# वैयाकरणसिद्धान्तकौमुदी

## स्त्रीप्रत्ययप्रकरणम् (१३)

## १८.०२.२०१३

# पुनरावर्तनम्

- बहुव्रीहेरूधसो ङीष् ।
- संख्याव्ययादेर्ङीप् ।
- दामहायनान्ताच्च ।
- नित्यं संज्ञाच्छन्दसोः ।
- केवलमामकभागधेयपापापरसमानार्यकृतसुमङ्गलभेषजाच्च ।

- पत्युर्नो यज्ञसंयोगे।
- विभाषा सपूर्वस्य ।
- नित्यं सपत्न्यादिषु ।

# ४९३. पूतक्रतोरै च (४.१.३६)

- पदत्रयम् । पूतक्रतोः, ऐ, च ।
- ‘स्त्रियाम्’ (४.१.३) इत्यधिक्रियते । ‘संख्याव्ययादेर्ङीप्’ (४.१.२६) इत्यतः ‘ङीप्’ इति अनुवर्तते ।
- अस्य स्त्रियाम् ऐ आदेशो ङीप् च ।

# इयं त्रिसूत्री पुंयोग एवेष्यते (वा)

- पूतक्रतोः स्त्री पूतक्रतायी ।
- पूतक्रतायीति ।
- ‘यया तु क्रतवः पूताः स्यात्पूतक्रतुरेव सा’ ।

# ४९४. वृषाकप्यग्निकुसितकुसिदानामुदात्तः (४.१.३७)

- पदद्वयम् । वृषाकपि-अग्नि-कुसित-कुसिदानाम्, उदात्तः ।
- ‘स्त्रियाम्’ (४.१.३) इत्यधिक्रियते । ‘संख्याव्ययादेर्ङीप्’ (४.१.२६) इत्यतः ‘ङीप्’ इति, ‘पूतक्रतोरै च’ (४.१.३६) इत्यतः ‘ऐ च’ इति च अनुवर्तते ।
- एषाम् उदात्तः ऐ आदेशः स्यान्ङीप् च ।
- वृषाकपेः स्त्री वृषाकपायी ।
- ‘हरविष्णू वृषाकपी’ इत्यमरः ।
- ‘वृषाकपायी श्रीगौर्यौ’ इति च ।

- अग्नायी ।
- कुसितायी, कुसिदायी ।
- कुसिदशब्दो ह्रस्वमध्यो न तु दीर्घमध्यः ।

# ४९५. मनोरौ वा (४.१.३८)

- पदत्रयम् । मनोः, औ, वा ।
- ‘स्त्रियाम्’ (४.१.३) इत्यधिक्रियते । ‘संख्याव्ययादेर्ङीप्’ (४.१.२६) इत्यतः ‘ङीप्’ इति, ‘पूतक्रतोरै च’ (४.१.३६) इत्यतः ‘ऐ च’ इति, ‘वृषाकप्यग्निकुसितकुसिदानामुदात्तः’ (४.१.३७) इत्यतः ‘उदात्तः’ इति च अनुवर्तते ।
- मनुशब्दस्य औकारादेशः स्याद् उदात्तैकारश्च वा, ताभ्यां सन्नियोगशिष्टो ङीप् च ।
- ताभ्यामिति ।
- मनोः स्त्री मनायी, मनावी, मनुः ।

# ४९६. वर्णादनुदात्तात्तोपधात्तो नः (४.१.३९)

- पञ्च पदानि । वर्णात्, अनुदात्तात्, तोपधात्, तः, नः ।
- ‘संख्याव्ययादेर्ङीप्’ (४.१.२६) इत्यतः ‘ङीप्’ इति, ‘मनोरौ वा’ (४.१.३८) इत्यतः ‘वा’ इति च अनुवर्तते ।
- वर्णवाची योऽनुदात्तान्तः तोपधः तदन्ताद् अनुपसर्जनात् प्रातिपदिकाद् वा ङीप् स्यात् तकारस्य नकारादेशश्च ।
- एनी, एता ।
- एनी, एतेति ।

- रोहिणी, रोहिता ।
- रोहिणी, रोहितेति ।

- ‘वर्णानां तणतिनितान्तानाम्’ (फि ३३) इति फिट्सूत्रेण आद्युदात्तः ।
- वर्णानामिति ।
- ‘त्र्येण्या शलल्या’ इति गृह्यम् ।
- त्रीणि एतानि अस्या इति बहुव्रीहिः ।
- त्र्येण्येति ।

- अनुदात्तात् किम् - श्वेता ।
- 'घृतादीनां च' (फि २१) इति अन्तोदात्तोऽयम् ।

- अत इत्येव ।
- शितिः स्त्री ।

# पिशाङ्गादुपसंख्यानम् (वा)

- पिशाङ्गी, पिशाङ्गा ।
- पिशाङ्गीति ।

# असितपलितयोर्न (वा)

- असिता ।
- पलिता ।
- असितेति ।

# छन्दसि क्रमेके (वा)

- असिक्नी ।
- पलिक्नी ।
- छन्दसि क्रमेके ।

- अवदातशब्दस्तु न वर्णवाची, किन्तु विशुद्धवाची ।
- तेन अवदाता इत्येव ।